International Journal of Sanskrit Research 2023; 9(3): 245-249

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 245-249
© 2023 IJSR
www.anantaajournal.com
Received: 12-02-2023
Accepted: 17-04-2023

**डाँ. विभूति लोचन शर्मा**
सहकारी अध्यापकः, असमीया विभागः, बड़ोलेण्ड विश्वविद्यालयः, बि.टि.आर्, असमः, भारत

Corresponding Author:
**डाँ विभूति लोचन शर्मा**
सहकारी अध्यापकः, असमीया विभागः, बड़ोलेण्ड विश्वविद्यालयः, बि.टि.आर्, असमः, भारत

# कौटिलीयार्थशास्त्रे राजस्वागमव्यवस्थायां धनदण्डस्य स्थानम्-एकमवलोकनम्

## डाँ. विभूति लोचन शर्मा

### प्रस्तावना

कस्यापि राष्ट्रस्य अर्थनैतिकप्रगतये राजस्वागमव्यवस्था परिकल्पिता भवति । तस्याम् परिकल्पनायाम् अनेके अर्थागमपरिकल्पनाः अर्थनीतिबिद्भिःकृयन्ते । प्राचीन भारतवर्षेऽपि राष्ट्रस्य आर्थिकस्तितेः पगतये सन्तुलनाय च तथाविधा अनेके परिकल्पना कृता । कौटिल्येन तु पूर्वाचार्यकृतानां आर्थिकनीतीनाम् अध्यनं कृत्वा संस्कारितार्थनीतयः उपस्थापिताः । विशेषतया राजस्वागमव्यवस्था यथा कौटिल्येन प्रवर्तिता तस्या आधुनिककालेऽपि गुरुत्वं वर्तते । दण्डविधानव्यवस्थायामपि अर्थनैतिकचिन्तनेन राष्ट्रियार्थनीतेः प्रगतिचिन्तनम् अपराधनियन्त्रणम् इति विषयद्वयस्य परिचिन्तनं कौटिल्येन कृतमासीदिति निर्विवादमेव । अस्मदालोचितशोधपत्रे कौटिल्यकालिकधनागमस्थानानां दुर्गनामकस्य धनागमस्थानस्य धनागमोपायानां मध्ये द्वितीयतमस्य धनदण्डस्य विश्लेषणं, मनु-याज्ञवल्क्य-कौटिल्यानं अर्थदण्डविधानां तुलना च करिष्यते ।

### जनराजस्वस्वरूपम्

केनापि कल्याणकामिराष्ट्रेण राष्ट्रियसुरक्षाविधानार्थं राष्ट्रियाभ्यन्तरिणविशृङ्खलान्यायविचारादिभ्यो जनानां सुरक्षार्थम् आर्थसामाजिकोन्नयनार्थञ्च स्वकीयदायित्वं परिपालनीयं भवति । तद्दायित्वस्य सम्यग्परिपालनार्थं सम्भावितव्ययस्य पूर्तिनिमित्तं विविधेभ्यः करऋणशुल्कदानाद्युद्गमस्थलेभ्यो यस्यार्थस्य उपार्जनं राष्ट्रियसर्वकारेण क्रियते तदेव जनराजस्वं भवति आधुनिककाले[१] । यथा एकस्मिन् राष्ट्रे उद्योगवित्तकोशाद्यर्थनैतिकसंविभागाः स्वकीयदायित्वानामनुपालनार्थं अर्थस्य प्रयोजनमनुभवन्ति तथैव राष्ट्रस्य सर्वकारोऽपि स्वकीयदायित्वानामनुपालनार्थम् अर्थस्य प्रयोजनमनुभवन्ति । तस्य प्रयोजनस्य पूर्तिनिमित्तमेव राजस्वस्य परिकल्पनं क्रियते सर्वकारेण । पाचीनकालाद भारतवर्षे जनकल्याणाय करादीनां संग्रहणप्रवृत्तिरासीदिति पुराणादिशास्त्रेभ्य अवगम्यते । तद्यथा मत्स्यपुराणे-

> वर्षिकाञ्चतुरो मासान् यथेन्द्रोऽप्यथ वर्षति ।
> तथाभिवर्षेत् स्वं राज्यं काममिन्द्रव्रतं स्मृतम् ॥
> अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः
> तथा हरेत् करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥[२]

अत्र हि सुन्दरतया उपमया राज्ञो दायित्वकर्तव्ययो विषयं स्मारयन् उच्यते यत् इन्द्रार्कद् राजा समाचरेत् । अर्थादिन्द्रो यथा वर्षस्य चतुर्मासान् वारिप्रदानेन जनानुपकरोति तथैव राजा अपि नियमितरूपेण प्रजानामभिलाष्यं सम्पूरयेत् । यथा च अष्टमासं यावद्रश्मिभिः पृतिव्या जलभागं सूर्यो हरति तथैव राजाऽपि प्रजागणानां सकाशात् करमाहरेत् ।
कौटिल्यकालेऽपि तथैव राष्ट्रियाभ्यन्तरिणविशृङ्कलान्यायाविचारादिभ्यो जनानां सुरक्षार्थम् आर्थसामाजिकोन्नयनार्थं, राष्टियसुररक्षाविधानार्थं च[३] देशीयजनानां वहिरागतजनानां च सकाशात् करधनद्रव्यादीनां यत् संग्रहणं राजनियोजिताध्यक्षादिभिः[४] क्रियते स्म तत्कौटिल्यकालिक-जनराजस्वमिति वक्तुं शक्यते । संक्षेपेण राजकीयायसमुदायमेव जनराजस्वमित्युच्यते । कौटिलीयार्थशास्त्रे तदानीन्तनकालस्य जनराजस्वसम्पर्कितविषयाः अलोच्यते इदानीम् । कौटिल्यकाले समुदयशब्दस्य[५] व्यवहारः राजस्वार्थे क्रियते इत्याभाति । समुदयशशब्दस्य प्रयोगवहुलता एव समुदयशब्दव्यवहारे कारणं भवितुमर्हति । पण्डितप्रवरेण रजनिकान्तशर्मणा[६] आर्. पि. काङ्ले. माहभागेन[७] चापि कौटिल्योक्ते समुदयशब्दे रास्वार्थ एव गृह्यते । मान्यवरेण वामनशिवराम-आप्तेनापि[८] समुदयशब्दस्य राजस्बमेवार्थः स्वीक्रियते। "राज्ञे देयं स्वं कररूपं धनम्" इति वाचस्पत्यादिकोशग्रन्थोपलब्धस्य[९] राजस्वशब्दस्यार्थस्य आधुनिककालप्रयुक्तेन राजस्वशब्दार्थेन सह अर्थगतसामञ्जस्यं तु दृश्यते एव । बोधसौकर्यार्थं प्रयोगबाहुल्यार्थं च अस्माभिरपि समुदयार्थे 'राजस्वम्' इति शब्दस्यैव व्यवहारः क्रियते अत्र शोधपत्रे ।

### जनराजस्वप्रवर्तनस्य उद्देश्यम्

यथा आधुनिककाले राष्ट्रसञ्चालनार्थं सुरक्षादिविधानार्थं च विविधव्ययानां प्रयोजनं भवति तथैव कौटिल्यकालेऽपि बहुषु स्तानेषु व्ययः करणीयः आसीत् राज्ञा । तदानीं ये व्ययाः अवधारिता आसन् तेषां विवरणानि द्वितीयाधिकरणस्य षष्ठाध्याये 'समाहर्तृसमुदयप्रस्थान'नामके चतुर्विंशाध्याये व्ययशरीरव्याख्यनवेलायां कृतं कौटिल्येन । देवपूजनार्थं पितृश्राद्धकर्मार्थं कृतो व्ययः, बालवृद्धानाथातुरादिभ्यो दीयमाना दानददक्षिणादिव्ययः, स्वस्तिवाचनार्थं पुरोहिताय देयं, अन्तःपुरसम्पर्कितव्ययः, राज्ञो महानसार्थे पाकशालार्थे वा कृतो व्ययः, दूतानां गमनागमनार्थं प्रदीयमानानां धनद्रव्यादिकानांव्ययः, कोष्ठागाराभिधानस्य राजकीयखाद्यद्रव्यागारस्य, निर्माणव्यवस्थापनादिव्ययः, आयुधागारसम्पर्कितानाम् अस्त्रनिर्माणरक्षणादिविषयेषु कृतो व्ययः, पण्यगृहाभिधानस्य विक्रेयद्रव्यनिवेशस्थानस्य व्यवस्थापनव्ययः, कुप्यगृहस्य वन्यसम्पद्गृहस्य वा वन्यसम्पदानयनरक्षणादिसम्पर्कितव्ययः, लोहसुवर्णशंखहीरकादिनां कर्मान्तगतव्ययः, विष्टिव्ययः[१०] कर्मकरादिव्ययो वा, पदातिकाश्वारोहिरथिसम्पर्कितव्ययः, गोमहीषमेषादीनां पोषणरक्षणादिषु करणीअयव्ययः, वन्यपशूनां मृगाणां पक्षीणां सिंहव्याघ्रादीनां च रक्षणस्थानादीनां निर्माणव्यवस्थापनादिव्ययः, काष्ठानां तृणानां च संरक्षणस्थाननिर्माणादिव्ययश्च इत्येते प्रमुखव्ययाः[११] तदानीमवधारिता आसन् । ईदृशानां व्ययानां कृते च राजकोशस्य समृद्धि आवश्यकी । अतः शुल्कसंग्रहेण करसंग्रहेण द्रव्यदानादिसंग्रहेण[१२] वाणिज्यादिसम्प्रसारणेन विविधापराधार्थमर्थदण्डादिविधानेन[१३] च राजकोशस्य समृद्धिः परिकल्प्यते स्म राज्ञा ।

### राजस्वागमव्यवस्थाः

केनापि राष्ट्रेण राष्ट्रियव्ययपूर्तिनिमित्तं यदा राजस्वं परिकल्प्यते तदा राजस्वागमव्यवस्था अपि परिकल्पनीया भवति । तथा हि कौटिल्यकालेऽपि राजस्वागमव्यवस्थाः परिकल्पिताः। कौटिलीयार्थशास्त्रे 'समाहर्तृसमुदयप्रस्थान' नामके चतुर्विंशप्रकरणे जनराजस्वगतविभागा निर्दिश्यन्ते । तत्र प्रमुखरूपेण आयशरीरम्, आयमुखम्, व्ययशरीरम् च स्पष्टीकृतम्[१४] । एतेषु आयशरीरम्, आयमुखम्, च राजस्वोत्पत्तिकारके भवतः । व्ययशरीरम् च करणीयानां राजकीयव्ययानां समष्टिर्भवति । आयशरीरान्तर्गतानां सप्तविधानां धनागमोपायानां धनागमस्थानानां वा परिकल्पनं कौटिल्येन कृतम् । तानि धनागमस्थानि यथा- दुर्गं, राष्ट्रं खनिः, वनं, व्रजः वणिक्पथश्चिति[१५] ।
दुर्गनामके आयशरीरे द्वाविंशतिधनागमोपाया[१६] निर्दिश्यन्ते कौटिल्येन । तेषु दण्डः द्वितीयतमः । आलोचितविषयप्रसङ्गात् अस्माभि दण्डस्यैव आलोचनं करिष्यते । इदमत्र स्मर्तव्यं यत् कौटिल्येन परिमानार्थे, सैन्यर्थे, राजनीत्यर्थे, अनुशासनार्थे च दण्डपदं चतुर्धा व्यवहृयते कौटिल्येन ।[१७] अनुशासनार्थे कायदण्डो(शारीरं), धनदण्डश्च(हिरण्यं) इति द्वौ विभागौ कल्पितौ कौटिल्येन[१८] । कौटिल्योक्तानाम् आयशरीरविभागानं दुर्गनामके विभागे आलोचितोऽयं दण्डः अनुशासनात्मकः । कौटिल्येनात्र दण्डपदेन धनदण्ड एव विवक्षितः । महामहोपाध्यायेन गणपतिशास्त्रिणा अपि कौटिल्योक्तेऽस्मिन् दण्डपदे उत्तमसाहसाद्यर्थदण्ड एव गृह्यते[१९] । सन्दर्भेऽस्मिन् मान्यवरेण काङ्लेमहोदयेनापि[२०] धनदण्डार्थे एव स्वमतमुपस्थापितम् ।

### स्मृतिशास्त्रेषु धनदण्डस्य परिलेखः

मनुसंहिता-याज्ञवल्क्यस्मृति-नारदस्मृतिप्रभृतिषु स्मृतिशास्त्रेषु धनदण्डस्य विधानं दृश्यते । मनुसंहितायां

चतुर्प्रकारकाणां धनदण्डानां विधानं कृतं दृश्यते । तानि खलु वाग् दण्डः, धिग् दण्डः, धनदण्डः, वधदण्डश्च । तद्यथा-

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम् ।
तृतीयं धनदण्डं तु वधदण्डमतः परम् ॥[२१]

याज्ञवल्क्यस्मृतौ अपि धिग् दण्डः, वाग् दण्डः, धनदण्डः, वधदण्डश्च निर्दिश्यन्ते-

धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा ।
योज्या व्यस्ताः समस्था वा ह्यपराधवशादिमे ॥[२२]

नारदस्मृतौ तु शारीरिकदण्डः अर्थदण्डश्च इति द्विधा द्वन्दस्य विभाजनं कृतम्-

शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः ।[२३]

अर्थदण्डस्य राजस्वाहरणे महत्वपूर्णं स्थानमासीत् कौटिल्यकाले । अस्माभिस्तावदादौ प्रथममध्यमोत्तमसाहसदण्डनामालोचनं क्रियये । साहसं खलु बलात् क्रियमाणमपहरणकर्मो भवति इत्युक्तं नारदेण-

साहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः ।
तत् साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥[२४]

मनुना अप्युक्तम्- "स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् ।"[२५]
याज्ञवल्क्येनाऽप्युक्तं- "सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतम् ।[२६]

## कौटिलीयार्थशास्त्रे प्रयुक्तानां धनदण्डानां परिलेखः-

कौटिलीयार्थशास्त्रे एकषोडशांशपणसंख्यकमारभ्य (one-sixteenth)[२७] द्विसप्ततिसहस्रपणसंख्यकं [२८] यावद् बहुविधा अर्थदण्डाः समुल्लिखिताः सन्ति । यत्र अर्थदण्डः पणसंख्यकेन विहितः तत्र पणपदन्तु तदानीन्तनकालस्य धनमिति अवगन्तव्यम् । पणविषये चोच्यते कोशे- "अशीतिभिर्वराटकैः पण इत्यभिधीयते"[२९] अनेन अशीतिसंख्यकानां वराटकसमपरिमानाणानां प्णमूल्य भव्ति । वराटकपदस्य हिन्दीभाषायां 'कौड़ी' असमीयाभाषायां 'कड़ि' बंगभाषायां 'कड़ि' नेपालीभाषायां च 'कौड़ी' इत्यादिनि प्रसिद्धरूपाणि प्राप्यन्ते । वर्तमानकाले एकस्य वराटकस्य मूल्यं एकरूप्यकं परिकल्प्य चिन्तयाम चेत् एकपणमूल्यं भवति अशीतिरूप्यकाणि । अनेन च एकषोडशांशपणस्य (one-sixteenth)पञ्चरूप्यकाणि, दशसहस्रपणस्य अष्टलक्ष्यं, द्विसप्ततिसहस्रपणस्य षष्ठिसहस्राधिकसप्तपञ्चाशल्लक्षम्(५७,६०,०००) रूप्यकाणि च सम्भन्ति ।

## मनु-याज्ञवल्क्य-कौटिल्यप्रयुक्तानां धनदण्डानां तुलना

मनुमतानुसारं प्रथमसाहसदण्डस्य २५०पणाः, मध्यममसाहसदण्डस्य ५००पणाः, उत्तमसाहसदण्डस्य १०००पणाश्च सम्भवन्ति[३०] । याज्ञवल्क्यमतेन च क्रमश- २७०पणाः, ५४०पणाः, १०८०पणाश्च प्रथममध्यमोत्तमसाहसानां सम्भवन्ति[३१] । पूर्वाचार्याणां मतमनुसृत्य कौटिल्येन अष्टचत्वारिंशत्पणपरिमितं(४८) तदधिकं षण्णवतिपणपरिमितं(९६पणाः) वा प्रथमसाहसस्य, द्विशतमारभ्य(२००) पञ्चशतं(५००) यावत् पणानि मध्यमसाहसस्य, पञ्चशतमारभ्य(५००) सहस्रं(१०००) यावत् पणानि उत्तमसाहसस्य इति तदीयार्थशास्त्रे एकसप्ततिप्रकरणे समुल्लिख्यते[३२] । दण्डकाले पुनः अपराधानुगुणं द्विगुणमारभ्य पञ्चाशद्गुणपर्यन्तम् अर्थदण्डाः परिकल्पिताः कौटिल्येण । यथा वस्त्रपरिवर्तकाय रजकाय वस्त्रमूल्यद्विगुणो दण्डः, पराशस्यापहर्तृकृषकाय शस्यपञ्चाशधुणदण्डश्च विधीयते कौटिल्यकाले[३३] अपराधनियन्त्रणार्थं प्रयुक्तानां धनदण्डानां संग्रहेण भूयांशस्य धनस्याहरणं कौटिल्यकाले कृतमासीत् येन च राष्ट्रियव्ययानां सम्पूर्तिः कल्पिता आसीदित्यनुमीयते ।

मूल्यनिर्धारकसूत्रम्-

| | |
|---|---|
| पण= | ८० वराटकाः (कौड़ी) |
| १ वराटकस्य मानमूल्यम् | १ रूप्यकम् |
| गुणितमूल्यम् | ८० रूप्यकाणि |

**दण्डानुसारम् पणपरिमानानि, रूप्यके च परिवर्तितपरिमानानि**

| १. | आचार्याः | दण्डप्रकाराः | दण्डपरिमाणानि | रूप्यके परिवर्तितपरिमाणानि |
|---|---|---|---|---|
| | मनुः | प्रथमसाहसः | २५०पणाः | २०,०००रूप्यकाणि |
| | | मध्यमसाहसः | ५००पणाः | ४०,०००रूप्यकाणि |
| | | उत्तमसाहसः | १०००पणाः | ८०,०००रूप्यकाणि |
| २. | याज्ञवल्क्यः | प्रथमसाहसः | २७०पणाः | २१,६००रूप्यकाणि |
| | | मध्यमसाहसः | ५४०पणाः | ४३,२००रूप्यकाणि |

| | | | | |
|---|---|---|---|---|
| | | उत्तमसाहसः | १०८०पणाः | ८६,४००रूप्यकाणि |
| ३. | कौटिल्यः | प्रथमसाहसः | ४८-९६पणाः | ३८४०-७६८०रूप्यकाणि |
| | | मध्यमसाहसः | २००-५००पणाः | १६०००-४०,०००रूप्यकाणि |
| | | उत्तमसाहसः | ५००-१०००पणाः | ४०,०००-८०,०००रूप्यकाणि |

## उपसंहारः

कौटिल्यकालिकार्थनैतिकचिन्तनम् जनकल्याणाय आसीदिति तदीयार्थनैतिकचिन्तनैरवगम्यते । दण्डविधानव्यवस्थायामपि आर्थिकप्रगतिचिन्तनम्, अपराधनियन्त्रणं चेति विषयद्वयस्य सन्तूलनं कौटिल्येन सम्यग् कृतमासीत् । पूर्वाचार्यविहितदण्दविधानानि अनुसृत्य संस्कारितनीतिभिः नव्यनीतिप्रयोगेण जनकल्याणमेव कौटिल्यस्य अर्थदण्दविधाने मूलम् । वर्तमानकाले हि अपराधानाम् आकाशलङ्घीविस्तृतिर्न केवलं राष्ट्रस्य आर्थिकस्थितिं अवनमितं करोति अपि तु जनजीवनं सन्त्रस्तं कृत्वा राष्ट्रस्य आभ्यन्तरिणश्रृङ्खलायाः हानिं जनयति । अस्यां परिस्थितौ कौटिल्यकालिकस्य अर्थदण्डविधानस्य उपयोग आधुनिककालस्य अपराधानां नियन्त्रणाय राष्ट्रियार्थिकप्रगतये भवितुमर्हति इतिशम् ।

## संक्षिप्ताक्षरकोशः

1. आ.सं.हि.को.- आप्ते, वामन् शिवराम ; संस्कृतहिन्दी कोश
2. कौ.अ. ; र.दे.- कौटिलीय अर्थशास्त्रम्; रजनीकान्तदेवशर्मसम्पादितम्
3. कौट. अ. ; त.ग.शा- कौटलीयम् अर्थशास्त्र; त. गणपति शास्त्री-सम्पादितम्
4. म.पू- मत्स्यपुराणम्
5. म.स्मृ.- मनुस्मृतिः
6. या.स्मृ.- याज्ञवल्क्यस्मृतिः
7. ना.स्मृ.- नारदस्मृतिः
8. वाच.- वाचस्पत्यम्
9. G.N.P.F.- Goswami, Nanigopal(ed.): Public Finance
10. K.A.-The Kautiliya Arthasastra: R.P. Kangle(ed.)

## सन्दर्भ

1. G.N.P.F.; पृ.- ५५
2. म.पु. ; २२६/१०,११
3. कौ.अ. ; र.दे(द्वि.ख) ; १/७/१; १/१३/७; २/१/१९-२१,२७; २/२/४; १३/४/२
4. तत्रैव, १/१२/६
5. तत्रैव,२/६,८
6. तत्रैव,(प्र.ख.); पृ.-४०,४५
7. K.A.(vol-2); pp.75,85
8. आ.सं.हि.को., पृ.-१०८०
9. वाच.(खण्ड-६), पृ ४८०३
10. दासकर्मकरवर्ग(The group of slaves and Labours) श्च विष्टिः ।
11. द्रष्टव्यः- K.A. (part-1&2) ; pp. 65,127
12. कौ.अ. ; र.दे(द्वि.ख) ; २/६/११
13. तत्रैव; २/१२/३५,३६; २/१५/३,६
14. तत्रैव; २/२२/१०-१४
15. तत्रैव; २/६/९,१०,११
16. तत्रैव; २/६/२-९
17. K.A.(vol-1) ;2/6/2 ; p. 41
18. कौ.अ.ट ; र.दे.(द्वि.ख); १/४/२, १/१३/२५, २/३/४, २/५/९, ४/११/२० 1७)
19. "शारीरं हैरण्यं वा दण्डं लभेत्" इत्यत्र हिरण्यपदं धनार्थे व्यवहृतः । द्रष्टव्यः- तत्रैव,२/८/३१
20. कौट. अ. ; त.ग.शा(प्रथमसम्पुटः); पृ.१३६
21. K.A.(vol-,2) ;2/6/2 ; p. 75
22. म.स्मृ. ; ८/१२९
23. या.स्मृ.; १/१३/३६७
24. ना. स्मृ. ; ४/१८/५३
25. तत्रैव ; ४/१४/१
26. म.स्मृ.; ८/३३२
27. या.स्मृ. ; २/२०/२३०
28. क्षुद्रपशुबधे एकषोड़शांसपणं दातव्यम् । कौ.अ. ; र.दे(द्वि.ख) ; ३/१०/२२
29. "प्राप्ताधिकारां गणिकां घातयतो निष्क्रयत्रिगुणो दण्डो" इत्युक्तं कौटिल्येन, पुनस्तेनैव निष्क्रयमूल्यं चतुर्विंशतिसहस्रमित्युक्तत्वात् तस्य त्रिगुणं द्विसप्ततिसहस्रं भवति अतस्तावत्परिमितपणानि दातव्यानि । कौ.अ. ; र.दे(द्वि.ख) ; २/२७/६,१६
30. आ.सं.हि. को. ; पृ. ५६६
31. म. स्मृ ; ८/१३८
32. या. स्मृ. ; १/१३/३६६
33. कौ.अ. ; र.दे(द्वि.ख) ; ३/१७/८-१०
34. तत्रैव- ४/१/१७,५/२/१३
35. ग्रन्थपञ्जी

36. आप्ते, वामन शिवराम. संस्कृत हिन्दी कोशः. मोतिलाल बनारसीदस पब्लिशर्स दिल्ली, १९६९.
37. तर्करत्न, पञ्चानन, सम्पा. मत्स्यपुराणम्(बङ्गभाषानुवादसहितम्). नवभारत पाब्लिशार्स, कलिकता, १८१२ शकाब्दः.

38. तर्कवाचस्पति, तारानाथ, सम्पा. वाचस्पत्यम्(षड्षु खण्डेषु). रष्टियसंस्कृतसंस्थानम्, नई दिल्ली द्वितीयप्रकाशनम्, २००६.
39. देवशर्मा, रजनीकान्त, सम्पा. कौटिलीय अर्थशास्त्र(असमीयानुवादसहितम्). Vol. तृतीयसंस्करणम्. असम प्रकाशन परिषद्, गुवाहाटी , २००३.
40. पाण्डेय, उमेश चन्द्र, सम्पा. याज्ञवल्क्यस्मृतिः. चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, वि.स., २०६०.
41. शास्त्री, हरगोविन्द, सम्पा. मनुस्मृतिः. चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, वि.स. २०५५.
42. शास्त्री, त. गणपति, सम्पा. कौटलीयम् अर्थशास्त्र(श्रीमूलाख्या व्याख्यया सहितम्, सम्पुटत्रयम्). रष्टियसंस्कृतसंस्थानम्, नई दिल्ली प्रथमप्रकाशनम्, २००२.
43. स्वाई, ब्रजकिशोर, सम्पा. नारदस्मृतिः. चौखम्बा संस्कृत भवन्, वाराणसी, वि.स., २०५३.
44. Goswami, Nanigopal. Public Finance. Jyotiprakasan, Guwahati, 2002.
45. Kangle R.P. (3 parts), ed. The Kautiliya Arthaśāstra. Motilal Banarasidas, Delhi, Reprint Edition, 2000.